भेदोऽस्तु वर्णानां तारमन्द्रवदिति"। तथा "शृणोति य इमं स्फोटं सुप्ते श्रोत्रे च शून्यदृक्। येन वाक् व्यज्यते यस्य व्यक्तिराकाश आत्मनः" इति भागवतवचने स्फोटात्मकशब्दश्रवणस्यात्मलिङ्गतोक्त्या स्फोटरूपशब्दोऽर्थायात इत्यवगन्तव्यम्। हरिवंशेऽपि "अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रयः" इति स्फोटस्य व्यञ्जकवर्णाश्रयत्वमभिहितम्। एतन्मताभिप्रायेणैव "स्फोट इत्याहेति" शारीरकभाष्ये स्फोटव्युत्पादनम् "वर्णा एव तु शब्द इति भगवानुपवर्ष इति" निराकरणन्तूपवर्षग्रहणात् तन्मताभिप्रायेण। "न स्फोटः प्रतीत्यप्रतीतिभ्यामिति" सांख्यसूत्रेऽपि स्फोटखण्डनन्तु पूर्वपक्षमताभिप्रायेणेति सर्वं सुस्थम्। स च स्फोटो वर्णपदादिभेदेन अनेकविधो बाहुल्यभयात् न प्रपञ्चितः। तस्य स्फोटस्याभिव्यक्तौ प्राकृतस्य ध्वनेः कारणत्वं चिरचिरतरस्थितौ तु प्राकृतध्वनिजातवैकृतध्वनेरिति विवेकः। तथा च वाक्यपदीये "स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते" इति। "स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते" इति च स्थितिभेदे चिरचिरतरकालस्थितौ ध्वनिस्तु पूर्वलक्षितः। तस्य च स्फोटस्य नित्यतया ध्वनिगतह्रस्वदीर्घादिकालस्य तत्रोपचारः। प्रतिपादितञ्च तथैव वाक्यपदीये "स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः। स्वभावतस्तु नित्यत्वात् ह्रस्वदीर्घप्लुतादिषु। प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्य्यते"। शब्दस्य स्फोटस्य नित्यतया अभिन्नकालस्य ह्रस्वदीर्घादिषु प्राकृतध्वनेः कालः तारत्वादिधीहेतुरुपचर्य्यते इति तदर्थः। एवञ्च विलम्बितोच्चारणस्थले तत्तद्वर्णानां तद्बोधजनितसंस्काराणां वा बहुक्षणपर्य्यन्तस्थायित्वकल्पनमपेक्ष्य एकस्यैव शब्दस्याभिव्यक्त्यनन्तरं जायमानेन वैकृतेन ध्वनिना बहुकालस्थितिकल्पने लाघवमित्यपि द्रष्टव्यम्। भेरीशब्दादौ च ध्वन्यभिव्यक्त्यनन्तरं जायमानप्राकृतध्वनेर्बहुकालस्थायित्वदर्शनेन अत्रापि तथाकल्पनौचित्यात्। अतएव च महाभाष्ये "एवं तर्हि स्फोटः शब्दो ध्वनिः शब्दगुणः" इत्यादिना अभिव्यक्त्युपकारकत्वेन ध्वनेः स्फोटरूपशब्दगुणत्वमभिहितमभिहितञ्च ध्वनेर्ह्रस्वदीर्घत्वेनापि भानम् यथा "ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते। स्वल्पो महांश्च केषाञ्चित् उभयं नैव स्वभावतः" इति न स्वभावतस्तद्रूपेण स्फोटो लक्ष्यत इत्यर्थः। ध्वनिविकारे च वायुसंयोगविशेषस्य हेतुत्वं तस्य बहुकालस्थायित्वे विलम्बितत्वमल्पकालस्थायित्वे द्रुतत्वमिति विवेकः। एवं बहुविधेषु स्फोटेषु वाक्यस्फोटस्यैव सिद्धान्ते निष्कृष्टतया तस्यैव बोधकत्वं तद्घटकपदानान्तु पदमध्यवर्त्तिवर्णवत् निरर्थकत्वं विशिष्टार्थद्योतनायैव तेषां प्रयोगात्। तथा च "ब्राह्मणार्थो यथा नास्ति कश्चित् ब्राह्मणकम्बले। देवदत्तादयो वाक्ये तथैव स्युर्निरर्थकाः" इति। "पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च। वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चनेति" च वाक्यपदीये पदाद्यसद्भाव दर्शयति। तथा "वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिरिति" हरिकारिकायां सिद्धान्ते वाक्यस्फोटस्यैव सिद्धिरिति प्रतिपादितम्"। २व्रणभेदे च (फोड़) राजनि०।

**स्फोटक** पु० स्फुट-ण्वुल्। (फोड़ा) १व्रणभेदे हेमच० २विदारके च।

**स्फोटन** न० स्फुट-ल्युट्। १विदारणे २विकाशने च भरतः

**स्फोटनी** स्त्री स्फुट्यतेऽनया स्फुट-ल्युट् ङीप्। मणिवेधनकरणे यन्त्रभेदे (भोमरा) द्विरूपको०।

**स्फोटबीजक** पु० स्फोटस्य व्रणभेदस्य बीजम् ततः स्वार्थे क। भल्लातके राजनि०। तत्फलनिर्यासंसंयोगात् व्रणोत्पत्तेस्तथा संज्ञा।

**स्फोटायन** पु० स्फोट एव अयनं अर्थबोधकतयाश्रयणं यस्य। अर्थबोधकत्वेन स्फोटाभ्युपगन्तरि वैयाकरणे मुनिभेदे "अवङ् स्फोटायनस्य" पाणिनि। [त्रिका०।

**स्फोटिका** स्त्री स्फुट-ण्वुल् टापि अत इत्वम्। चापलिकायां

**स्फ्य** न० स्फाय-यन् नि०। खड्गाकारे यज्ञार्थे काष्ठभेदे ति०त०

**स्फ्याश्लिष्टेज्याधिकरण** न० अधिकरणभेदे ति० त०

"स्फ्याश्लिष्टेज्याधिकरणञ्च स्फ्यस्य खड्गाकारकाष्ठस्य मन्त्रोपनिमित्तकस्य यागाभिहितत्वेन प्रकृतवद्विकृतिरित्यतिदेशेन दर्शात्मकप्रकृतिधर्माणां प्राप्तौ पूर्वदिनप्रातःकालीनं हवनीयदेवतावाहनमपि प्राप्तं तच्च तदानीं न विधीयते नैमित्तिके निमित्तनिश्चयवतोऽधिकारितया प्रकृते स्वाभाविकस्य तद्रूपनिमित्तस्याभावेन प्रधानानधिकारिणोऽङ्गानधिकारात् उत्तरदिने च निमित्तनिश्चये तदधिकारसद्भावेऽपि नावाहनानुष्ठानम् आवाहनस्य पूर्वदिनप्रातःकालनैयत्यादिति व्याख्याय आवाहनं विनैवानुष्ठानम्"

**स्म** अव्य० स्मि-ड। १अतीते २पादपूरणे च अमरः।

**स्मय** पु० स्मि-अच्। १गर्वे २अद्भुतरसस्थायिभावे च मेदि०।